# भज गोविन्दं

भज गोविन्दं भज गोविन्दं गोविन्दं भज मूढमते ।
सम्प्राप्ते सन्निहिते काले नहि नहि रक्षति डुकृङ्करणे ॥ १॥

मूढ जहीहि धनागम तृष्णां कुरु सद्बुद्धिं मनसि वितृष्णाम् ।
यल्लभसे निज कर्मोपात्तं वित्तं तेन विनोदय चित्तम् ॥ २॥

नारी स्तन भर नाभी देशं दृष्ट्वा मा गा मोहावेशम् ।
एतन्मांस वसादि विकारं मनसि विचिन्तय वारं वारम् ॥ ३॥

नलिनी दलगत जल मतितरलं तद्वज्जीवित मतिशय चपलम् ।
विद्धि व्याध्यभिमान ग्रस्तं लोकं शोकहतं च समस्तम् ॥ ४॥

यावद्वित्तो पार्जन सक्त- स्ताव न्निज परिवारो रक्तः ।
पश्चा ज्जीवति जर्जर देहे वार्तां कोऽपि न पृच्छति गेहे ॥ ५॥

यावत्पवनो निवसति देहे तावत्पृच्छति कुशलं गेहे ।
गतवति वायौ देहापाये भार्या बिभ्यति तस्मिन्काये ॥ ६॥

बालस्ताव त्क्रीडा सक्तः तरुण स्ताव त्तरुणी सक्तः ।
वृद्ध स्ताव च्चिन्ता सक्तः परमे ब्रह्मणि कोऽपि न सक्तः ॥ ७॥

का ते कान्ता कस्ते पुत्रः संसारोऽय मतीव विचित्रः ।
कस्य त्वं कः कुत आयात- स्तत्त्वं चिन्तय तदिह भ्रातः ॥ ८॥

सत्सङ्गत्वे निस्सङ्गत्वं निस्सङ्गत्वे निर्मोहत्वम् ।
निर्मोहत्वे निश्चलतत्त्वं निश्चलतत्त्वे जीवन्मुक्तिः ॥ ९॥

वयसि गते कः काम विकारः शुष्के नीरे कः कासारः ।
क्षीणे वित्ते कः परिवारः ज्ञाते तत्त्वे कः संसारः ॥ १०॥

मा कुरु धन जन यौवन गर्वं हरति निमेषात्कालः सर्वम् ।
माया मय मिद मखिलं हित्वा ब्रह्मपदं त्वं प्रविश विदित्वा ॥ ११॥

दिन यामिन्यौ सायं प्रातः शिशिर वसन्तौ पुन रायातः ।
कालः क्रीडति गच्छत्यायु- स्तदपि न मुञ्चत्याशा वायुः ॥ १२॥

का ते कान्ता धन गत चिन्ता वातुल किं तव नास्ति नियन्ता ।
त्रिजगति सज्जन सङ्गति रेका भवति भवार्णव तरणे नौका ॥ १३॥

जटिलो मुण्डी लुञ्छित केशः काषायाम्बर बहुकृत वेषः ।
पश्यन्नपि च न पश्यति मूढो ह्युदर निमित्तं बहुकृत वेषः ॥ १४॥

अङ्गं गलितं पलितं मुण्डं दशन विहीनं जातं तुण्डम् ।
वृद्धो याति गृहीत्वा दण्डं तदपि न मुञ्चत्याशा पिण्डम् ॥ १५॥

अग्रे वह्निः पृष्ठे भानुः रात्रौ चुबुक समर्पित जानुः ।
करतल भिक्ष स्तरुतल वास- स्तदपि न मुञ्चत्याशा पाशः ॥ १६॥

कुरुते गङ्गा सागर गमनं व्रत परिपालन मथवा दानम् ।
ज्ञान विहीनः सर्वमतेन मुक्तिं न भजति जन्म शतेन ॥ १७॥

सुरमंदिर तरुमूल निवासः शय्या भूतल मजिनं वासः ।
सर्व परिग्रह भोग त्यागः कस्य सुखं न करोति विरागः ॥ १८॥

योगरतो वा भोगरतो वा सङ्गरतो वा सङ्ग विहीनः ।
यस्य ब्रह्मणि रमते चित्तं नन्दति नन्दति नन्दत्येव ॥ १९॥

भगवद्गीता किञ्चि दधीता गङ्गाजल लव कणिका पीता ।

सकृदपि येन मुरारि समर्चा क्रियते तस्य यमेन न चर्चा ॥ २०॥

पुनरपि जननं पुनरपि मरणं पुनरपि जननी जठरे शयनम् ।
इह संसारे बहुदुस्तारे कृपयाऽपारे पाहि मुरारे ॥ २१॥

रथ्या चर्पट विरचित कन्थः पुण्यापुण्य विवर्जित पन्थः ।
योगी योग नियोजित चित्तो रमते बालोन्मत्तव देव ॥ २२॥

कस्त्वं कोऽहं कुत आयातः का मे जननी को मे तातः ।
इति परिभावय सर्व मसारम् विश्वं त्यक्त्वा स्वप्न विचारम् ॥ २३॥

त्वयि मयि चान्यत्रैको विष्णु- र्व्यर्थं कुप्यसि मय्य सहिष्णुः ।
भव समचित्तः सर्वत्र त्वं वाञ्छ स्यचिरा द्यदि विष्णुत्वम् ॥ २४॥

शत्रौ मित्रे पुत्रे बन्धौ मा कुरु यत्नं विग्रहसन्धौ ।
सर्वस्मि न्नपि पश्यात्मानं सर्वत्रोत्सृज भेदाज्ञानम् ॥ २५॥

कामं क्रोधं लोभं मोहं त्यक्त्वाऽऽत्मानं भावय कोऽहम् ।
आत्मज्ञान विहीना मूढा- स्ते पच्यन्ते नरक निगूढाः ॥ २६॥

गेयं गीता नाम सहस्रं ध्येयं श्रीपति रूप मजस्रम् ।
नेयं सज्जन सङ्गे चित्तं देयं दीनजनाय च वित्तम् ॥ २७॥

सुखतः क्रियते रामाभोगः पश्चाद्धन्त शरीरे रोगः ।
यद्यपि लोके मरणं शरणं तदपि न मुञ्चति पापाचरणम् ॥ २८॥

अर्थ मनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम् ।
पुत्रादपि धन भाजां भीतिः सर्वत्रैषा विहिता रीतिः ॥ २९॥

प्राणायामं प्रत्याहारं नित्यानित्य विवेक विचारम् ।
जाप्यसमेत समाधि विधानं कुर्ववधानं महदवधानम् ॥ ३०॥

गुरुचरणाम्बुज निर्भर भक्तः संसारा दचिराद्भव मुक्तः ।
सेन्द्रिय मानस नियमा देवं द्रक्ष्यसि निजहृदयस्थं देवम् ॥ ३१॥